अवघोधे

८।७या

इ. वि. का. राजवाडे संशोधन मंदिर
क्रमांक ...... ३ ......
हस्तलिखित ग्रंथ संग्रह.

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

॥ अथअष्टाध्येप्रारंभः ॥ छ ॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

सू०

श्रीगणेशायनमः॥ ॥ॐ ३ म्॥ येनाक्षरसमाम्नायमधिगम्यमहेश्वरात्॥ कृत्स्नंव्याकरणंप्रोक्तंतस्मैपाणिनयेनमः॥१॥
॥१॥ येनधौतागिरःपुंसांविमलैःशब्दवारिभिः॥ तमश्चाज्ञानजंभिन्नंतस्मैपाणिनयेनमः॥२॥ अइउण्॥ ऋऌक्॥ एओ
ङ्॥ ऐऔच्॥ हयवरट्॥ लण्॥ ञमङणनम्॥ झभञ्॥ घढधष्॥ जबगडदश्॥ खफछठथचटतव्॥ कपय्॥ शष
सर्॥ हल्॥ ॥इतिप्रत्याहारसूत्राणि॥ ॥वृद्धिरादैच्॥ अदेङ्गुणः॥ इकोगुणवृद्धी॥ नधातुलोपआर्द्धधा
तुके॥ क्ङितिच॥ दीधीवेवीटां॥ हलोनंतराःसंयोगः॥ मुखनासिकावचनोनुनासिकः॥ तुल्यास्यप्रयत्नंसवर्णं॥ ना
ज्झलौ॥ ईदूदेद्द्विवचनंप्रगृह्यं॥ अदसोमात्॥ शेनिपातएकाजनाङ्॥ ओत्॥ संबुद्धौशाकल्यस्येतावनार्षे॥ उञः॥
ऊँ॥ ईदूतौचसप्तम्यर्थे॥ दाधाघ्वदाप्॥१॥ ॥आद्यंतवदेकस्मिन्॥ तरप्तमपौघः॥ बहुगणवतुडतिसंख्या॥ ष्णां
ताषट्॥ डतिच॥ क्तक्तवतूनिष्ठा॥ सर्वादीनिसर्वनामानि॥ विभाषादिक्समासेबहुव्रीहौ॥ न तृतीयासमासे॥
द्वंद्वेच॥ विभाषाजसि॥ प्रथमचरमतयाल्पार्द्धकतिपयनेमाश्च॥ पूर्वपरावरदक्षिणोत्तरापराधराणिव्यवस्था
यामसंज्ञायां॥ स्वमज्ञातिधनाख्यायां॥ अंतरंबहिर्योगोपसंव्यानयोः॥ स्वरादिनिपातमव्ययं॥ तद्धितश्चा

नबहुव्रीहौ ३ ॥२॥

(2A)

सर्वविभक्तिः। कृन्मेजंतः। क्त्वातोसुन्कसुनः॥२॥ अव्ययीभावश्च। शिसर्वनामस्थानं। सुडनपुंसकस्य।
भा नवेतिविभाषा। इग्यणः संप्रसारणं। आद्यंतौटकितौ। मिदचोंत्यात्परः। एचइग्घ्रस्वादेशे। षष्ठीस्थानेयोगा। स्था
नेंतरतमः। उरण्रपरः। अलोंत्यस्य। ङिच्च। आदेःपरस्य। अनेकाल्शित्सर्वस्य। स्थानिवदादेशोनल्विधौ। अचः
परस्मिन्पूर्वविधौ। नपदांतद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु। द्विर्वचनेचि। अदर्शनंलो प्र
प्र पः॥३॥ प्रत्ययस्यलुक्श्लुलुपः। प्रत्ययलोपेप्रत्ययलक्षणं। नलुमतांगस्य। अचोंत्यादिटि। अलोंत्यात्पूर्वउपधा॥
त्रि तस्मिन्निति निर्दिष्टेपूर्वस्य। तस्मादित्युत्तरस्य। स्वंरूपंशब्दस्याशब्दसंज्ञा। अणुदित्सवर्णस्यचाप्रत्ययः। तपरस्तत्काल दि
स्य। आदिरंत्येनसहेता। येनविधिस्तदंतस्य। वृद्धिर्यस्याचामादिस्तद्वृद्धं। त्यदादीनिच। एङ्प्राचांदेशे॥४॥ ॥
वृद्धिराद्यंतवदव्ययीभावः प्रत्ययस्यलुक्यंचदरा॥ इतिप्रथमःपादः॥ ॥ गाङ्कुटादिभ्योञ्णिन्ङित्। विजइ
ट्। विभाषोर्णोः। सार्वधातुकमपित्। असंयोगाल्लिट्कित्। इंधिभवतिभ्यांच। मृडमृदगुधकुषक्लिशवदवसः
क्त्वा। रुदविदमुषग्रहिस्वपिप्रच्छःसंश्च। इकोझल्। हलंताच्च। लिङ्सिचावात्मनेपदेषु। उश्च। वागमः। हनःसि

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. Joint project of the

च्च।यमोगंधने।विभाषोपयमने।स्थाघ्वोरिच्च।नक्त्वासेट्।निष्ठाशीङ्स्विदिमिदिक्ष्विदिधृषः।मृषस्तितिक्षायां।।१।।
।।२।। उदुपधाद्भावादिकर्मणोरन्यतरस्यां।पूङः क्त्वाच।नोपधात्थफान्ताद्वा।वंचिलुंच्यृतश्च।तृषिमृषिकृशेः काश्यपस्य।रलोव्युप
द्वि धाद्धलादेः संश्च।ऊकालोऽज्झ्रस्वदीर्घप्लुतः।अचश्च।उच्चैरुदात्तः।नीचैरनुदात्तः।समाहारः स्वरितः।तस्यादितउदात्तमर्धह्रस्वं।
एकश्रुतिदूरात्संबुद्धौ।यज्ञकर्मण्यजपन्यूंखसामसु।उच्चैस्तरांवावषट्कारः।विभाषाछंदसि।नसुब्रह्मण्यायांस्वरितस्य
तूदात्तः।देवब्रह्मणोरनुदात्तः।स्वरितात्संहितायामनुदात्तानां।उदात्तस्वरितपरस्यसंनतरः।।२।।अपृक्तएकाल्प्रत्ययः।तत्पु
रुषः समानाधिकरणः कर्मधारयः।प्रथमानिर्दिष्टंसमासउपसर्जनं।एकविभक्तिचापूर्वनिपाते।अर्थवदधातुरप्रत्ययः
प्रातिपदिकं।कृत्तद्धितसमासाश्च।ह्रस्वोनपुंसकेप्रातिपदिकस्य।गोस्त्रियोरुपसर्जनस्य।लुक्तद्धितलुकि।इद्गोण्याः।लुपियु
क्तवद्व्यक्तिवचने।विशेषणानांचाजातेः।तदशिष्यंसंज्ञाप्रमाणत्वात्।लुब्योगाप्रख्यानात्।योगप्रमाणेचतदभावेऽदर्शनंस्या
त्।प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्।कालोपसर्जनेचतुल्यं।जात्याख्यायामेकस्मिन्बहुवचनमन्यत
रस्यां।अस्मदोद्वयोश्च।फल्गुनीप्रोष्ठपदानांचनक्षत्रे।।३।।छंदसिपुनर्वस्वोरेकवचनं।विशाखयोश्च।

(3A) तिष्यपुनर्वस्वोर्नक्षत्रद्वंद्वेबहुवचनस्यद्विवचनंनित्यं।सरूपाणामेकशेषएकविभक्तौ।वृद्धोयूनातल्लक्षणश्चेदेवविशे
षः।स्त्रीपुंवच्च।पुमांस्त्रिया।भ्रातृपुत्रौस्वसृदुहितृभ्यां।नपुंसकमनपुंसकेनैकवच्चा[illegible]स्यान्यतरस्यां।पितामात्रा।
श्वश्रा। श्वशुरःश्वश्र्वा।त्यदादीनिसर्वैर्नित्यं।ग्राम्यपशुसंघेष्वतरुणेषुस्त्री॥४॥गाङ्कुटाद्यक्दुपधादृपत्कश्छंदसिपुनर्वस्वोस्त्र
योदश॥ ॥इतिद्वितीयःपादः॥ ॥भूवादयोधातवः।उपदेशेजनुनासिकइत्।हलंत्यं।नविभक्तौतुस्माः।आदी
र्त्रिटुडवः।षःप्रत्ययस्य।चुटू।लशक्वतद्धिते।तस्यलोपः।यथासंख्यमनुदेशःसमानां।स्वरितेनाधिकारः।अनुदात्तङित
आत्मनेपदं।भावकर्मणोः।कर्तरिकर्मव्यतिहारे।नगतिहिंसार्थेभ्यः।इतरेतरान्योन्योपपदाच्च।नेर्विशः।परिव्यवे
भ्यःक्रियः।विपराभ्यांजेः।आङोदोनास्यविहरणे॥३॥क्रीडोनुसंपरिभ्यश्च।समवप्रविभ्यःस्थः।प्रकाशनस्थेयाख्ययोश्च। स्थः
उदोनूर्ध्वकर्मणि।उपान्मंत्रकरणे।अकर्मकाच्च।उद्विभ्यांतपः।आङोयमहनः।समोगम्यृच्छिप्रच्छिस्वरत्यर्तिश्रुविदिभ्यः।नि
समुपविभ्योह्वः।स्पर्धायामाङः।गंधनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषुकृञः।अधेःप्रसहने।वेःशब्दक
र्मणः।अकर्मकाच्च।संमाननोत्संजनाचार्यकरणज्ञानभृतिविगणनव्ययेषुनियः।कर्तृस्थेचाशरीरेकर्मणि।वृत्तिसर्गता

यनेषुक्रमः। उपपराभ्यां। आङउद्गमने॥२॥ वेःपादविहरणे। प्रोपाभ्यांसमर्थाभ्यां। अनुपसर्गाद्वा। अपह्नवेज्ञः। अकर्मकाच्च।
॥३॥ संप्रतिभ्यामनाध्याने। भासनोपसंभाषाज्ञानयत्नविमत्युपमंत्रणेषुवदः। व्यक्तवाचांसमुच्चारणे। अनोरकर्मकात्। विभाषाविप्र
(५) लापे। अवाद्ग्रः। समःप्रतिज्ञाने। उदश्चरःसकर्मकात्। समस्तृतीयायुक्तात्। दाणश्चसाचेच्चतुर्थ्यर्थे। उपाद्यमस्वकरणे।
ज्ञाश्रुस्मृदृशांसनः। नानोर्ज्ञः। प्रत्याङ्भ्यांश्रुवः। शदेःशितः॥३॥ म्रियतेर्लुङ्लिङोश्च। पूर्ववत्सनः। आम्प्रत्ययवत्कृञोनुप्रयो
गस्य। प्रोपाभ्यांयुजेरयज्ञपात्रेषु। समःक्ष्णुवः। भुजोनवने। णेरणौयत्कर्मणौचेत्सकर्तानाध्याने। भीस्म्योर्हेतुभये। गृधिवं
च्योःप्रलंभने। लियःसंमाननशालीनीकरणयोश्च। मिथ्योपपदात्कृञोभ्यासे। स्वरितञितःकर्त्रभिप्रायेक्रियाफले। अ
पाद्वदः। णिचश्च। समुदाङ्भ्योयमोऽग्रंथे। अनुपसर्गाज्ज्ञः। विभाषोपपदेनप्रतीयमाने। शेषात्कर्तरिपरस्मैपदं। अनुपराभ्यांकृ
ञः। अभिप्रत्यतिभ्यःक्षिपः॥४॥ प्राद्वहः। परेर्मृषः। व्याङ्परिभ्योरमः। उपाच्च। विभाषाकर्मकात्। बुधयुधनशजनेङ्
प्रुद्रुस्रुभ्योणेः। निगरणचलनार्थेभ्यश्च। अणावकर्मकाच्चित्तवत्कर्तृकात्। नपादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवे
सः। वाक्यषः। द्युद्भ्योलुङि। वृद्भ्यःस्यसनोः। लुटिचकॢपः॥५॥ भूवादयःक्रीडोनुवेःपादंम्रियतेःप्राद्वहस्त्रयोदश॥ इतित ॥३॥

(5A)

तीयःपादः॥ ॥आकडारादेकासंज्ञा।विप्रतिषेधेपरंकार्यं।यूस्त्र्याख्यौनदी।नेयङुवङ्स्थानावस्त्री।वामि।ङितिह्रस्व
श्च।शेषोघ्यसखि।पतिःसमासएव।षष्ठीयुक्तश्छन्दसिवा।ह्रस्वंलघु।संयोगेगुरु।दीर्घंच।यस्मात्प्रत्ययविधिस्तदादि।प्रत्ययेंगं।
सुप्तिङंतंपदं।नःक्ये।सितिच।स्वादिष्वसर्वनामस्थाने।यचिभं।तसौमत्वर्थे।अयस्मयादीनिछंदसि॥१॥बहुषुबहुवचनं।
द्व्येकयोर्द्विवचनैकवचने।कारके।ध्रुवमपायेपादानं।भीत्रार्थानांभयहेतुः।पराजेरसोढः।वारणार्थानामीप्सितः।अंतर्द्धौयो
नादर्शनमिच्छति।आख्यातोपयोगे।जनिकर्तुःप्रकृतिः।भुवःप्रभवः।कर्मणायमभिप्रैतिससंप्रदानं।रुच्यर्थानांप्रीयमाणः।श्लाघ
ह्नुङ्स्थाशपांज्ञीप्स्यमानः।धारेरुत्तमर्णः।स्पृहेरीप्सितः।क्रुधद्रुहेर्ष्यासूयार्थानांयंप्रतिकोपः।क्रुधद्रुहोरुपसृष्टयोःकर्म।राधीक्ष्यो
र्यस्यविप्रश्नः।प्रत्याङ्भ्यांश्रुवःपूर्वस्यकर्ता॥२॥अनुप्रतिगृणश्च।साधकतमंकरणं।दिवःकर्मच।परिक्रयणेसंप्रदानमन्य
तरस्यां।आधारोधिकरणं।अधिशीङ्स्थासांकर्म।अभिनिविशश्च।उपान्वध्याङ्वसः।कर्तुरीप्सिततमंकर्म।तथा
युक्तंचानीप्सितं।अकथितंच।गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्तासणौ।हृक्रोरन्यतरस्यां।स्वतंत्रः
कर्ता।तत्प्रयोजकोहेतुश्च।प्राग्रीश्वरान्निपाताः।चादयोसत्वे।प्रादयः।उपसर्गाःक्रियायोगे।गतिश्च॥३॥उर्यो

(5)

सू०पा०

दिग्धिँडाचश्च।अनुकरणंच।नितिपरं।आदरानादरयोः सदसती।भूषणेलं।अंतरपरिग्रहे।कणेमनसीश्रद्धाप्रतीघाते।
पुरोव्ययं।अस्तंच।अगत्यर्थवेदेषु।अदोनुपदेशे।तिरोंतर्द्धौ।विभाषाकृञि।उपाजेन्वाजे।साक्षात्प्रभृतीनिच।अनत्याधा
११४॥ धानउरसिमनसी।मध्येपदेनिवचनेच।नित्यंहस्तेपाणावुपयमने।प्राध्वंबंधने।जीवकोपनिषदावौपम्ये।तेप्राग्धातोः॥
॥४॥छंदसिपरेपि।व्यवहिताश्च।कर्मप्रवचनीयाः।अनुर्लक्षणे।तृतीयार्थे।हीने।उपोधिकेच।अपपरीवर्जने।या
आङ्मर्यादावचने।लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः।अभिरभागे।प्रतिःप्रतिनिधिप्रतिदानयोः।अधि
र परीअनर्थकौ।सुःपूजायां।अतिरतिक्रमणेच।अपिःपदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु।अधिरीश्वरे।विभाषा
कृञि।लः परस्मैपदं।तङानावात्मनेपदं॥५॥तिङस्त्रीणित्रीणिप्रथममध्यमोत्तमाः।तान्येकवचनद्विवचनबहुवचना
न्येकशः।सुपः।विभक्तिश्च।युष्मद्युपपदेसमानाधिकरणेस्थानिन्यपिमध्यमः।प्रहासेचमन्योपपदेमन्यतेरुत्तमएक
वच्च।अस्मद्युत्तमः।शेषेप्रथमः।परःसन्निकर्षः संहिता।विरामोवसानं॥६॥आकडाराद्बहुषत्तिप्रतिस्मणऊर्योदिछंद
दसिसिङोदश॥ ॥इतिचतुर्थःपादः॥प्रथमाध्यायःसमाप्तः॥ ॥ॐम्॥समर्थःपदविधिः।सुबामंत्रितेपरां

॥४॥

Joint project of the Rajawade Samshodhan Mandal Dhule and the Yashwantrao Chavan Pratishthan Mumbai

(5A)

गवस्त्वरे। प्राक्कडारात्समसः। सहसुपा। अव्ययीभावः। अव्ययंविभक्तिसमीपसमृद्धिव्यृध्यर्थाभावात्ययासंप्र
तिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसंपत्तिसाकल्यांतवचनेषु। यथासादृश्ये। यावदवधारणे।
सुप्प्रतिनामात्रार्थे। अक्षशलाकासंख्याःपरिणा। विभाषा। अपपरिबहिरंचवःपंचम्या। आङ्मर्यादाभिविध्योः। लक्ष
णेनाभिप्रती आभिमुख्ये। अनुर्यत्समया। यस्यचायामः। तिष्ठद्गुप्रभृतीनिच। पारेमध्येषष्ठ्यावा॥१॥ अन्यपदार्थेचसं
ज्ञायां। तत्पुरुषः। द्विगुश्च। द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः। स्वयंक्तेन। खट्वाक्षेपे। सामि। कालाः। अत्यं
तसंयोगेच। तृतीयातत्कृतार्थेनगुणवचनेन। पूर्वसदृशसमानार्थकलहनिपुणमिश्रश्लक्ष्णैः। कर्तृकरणेकृताबहु
लं। कृत्यैरधिकार्थवचने। अन्नेनव्यंजनं। भक्ष्येणमिश्रीकरणं। चतुर्थीतदर्थार्थबलिहितसुखरक्षितैः। पंचमीभये
न। अपेतापोढमुक्तपतितापत्रस्तैरल्पशः। स्तोकांतिकदूरार्थकृच्छ्राणिक्तेन। सप्तमीशौण्डैः॥२॥ सिद्धशुष्कपक्वबंधैश्च।
ध्वांक्षेणक्षेपे। पात्रेसमितादयश्च। पूर्वकालैकसर्वजरत्पुराणनवकेवलाःसमानाधिकरणेन। दिक्संख्येसंज्ञायां। तद्धिता
र्थोत्तरपदसमाहारेच। संख्यापूर्वोद्विगुः। कुत्सितानिकुत्सनैः। पापाणकेकुत्सितैः। उपमानानिसामान्यवचनैः। उपमि
च ते
क्तैर्व्याघ्रादिभिः सामान्याप्रयोगे
कृत्येऋणे। संज्ञायां। क्तेनाहोरात्रावयवाः। तत्र। क्षेपे। २

तंव्याघ्रादिभिः सामान्याप्रयोगे। विशेषणं विशेष्येण बहुलं। पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च। श्रेण्यादयः कृ
तादिभिः। क्तेन नञ्विशिष्टेनानञ्॥३॥ सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः। वृंदारकनागकुंजरैः पूज्यमानं। कतरकतमौ जाति
परिप्रश्ने। किं क्षेपे। पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्[illegible]ष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः। प्रशंसा
वचनैश्च। युवाखलतिपलितवलिनजरतीभिः। कृत्यतुल्याख्या अजात्या। वर्णो वर्णेन। कुमारश्रमणादिभिः। चतुष्पाद
गर्भिण्या। मयूरव्यंसकादयश्च॥४॥ समर्थोन्यपदार्थे सिद्धशुष्क स[illegible]महद्वादशस्या॥ इतिप्रथमःपादः॥ ॥पूर्वापराधरो
तरमेकदेशिनैकाधिकरणे। अर्द्धं नपुंसकं। द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्यां। प्राप्तापन्ने च द्वितीयया। कालाः परिमाणिना।
नञ्। ईषदकृता। षष्ठी। याजकादिभिश्च। न निर्धारणे। पूरणगुणसुहितार्थसद्व्ययतव्यसमानाधिकरणेन। क्तेन च पूजायां। अधिकर
णवाचिना च। कर्मणि च। तृजकाभ्यां कर्तरि। कर्तरि च। नित्यं क्रीडाजीविकयोः। कुगतिप्रादयः। उपपदमतिङ्। अमैवाव्ययेन॥१॥
तृतीयाप्रभृतीन्यन्यतरस्यां। क्त्वा च। शेषो बहुव्रीहिः। अनेकमन्यपदार्थे। संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये। दिङ्नामा
न्यंतराले। तत्र तेनेदमिति सरूपे। तेन सहेति तुल्ययोगे। चार्थे द्वंद्वः। उपसर्जनं पूर्वं। राजदंतादिषु परं। द्वंद्वे घि। अजाद्यदंतं। अं

ल्याच्चूतरं। सप्तमीविशेषणेबहुव्रीहौ। निष्ठा। वाहिताग्न्यादिषु। कडाराःकर्मधारये॥२॥ पूर्वापराधरोत्तरंतृतीयाप्रभृती
(6A) न्यन्यतरस्यां॥ ॥ इतिद्वितीयःपादः॥ अनभिहिते। कर्मणिद्वितीया। तृतीयाचहोश्छंदसि। अंतरांतरेणयुक्ते। कालाध्वनोरत्यंत
संयोगे। अपवर्गेतृतीया। सप्तमीपंचम्यौकारकमध्ये। कर्मप्रवचनीययुक्तेद्वितीया। यस्मादधिकंयस्यचेश्वरवचनंतत्रसप्त
मी। पंचम्यपाङ्परिभिः। प्रतिनिधिप्रतिदानेचयस्मात्। गत्यर्थकर्मणिद्वितीयाचतुर्थ्यौचेष्टायामनध्वनि। चतुर्थीसंप्रदाने।
क्रियार्थोपपदस्यचकर्मणिस्थानिनः। तुमर्थाच्चभाववचनात्। नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च। मन्यकर्मण्यना ना
दरेविभाषाप्राणिषु। कर्तृकरणयोस्तृतीया। सहयुक्तेऽप्रधाने। येनांगविकारः॥१॥ इत्थंभूतलक्षणे। संज्ञोन्यतरस्यांकर्मणि। हेतौ। अ
कर्त्तर्यृणेपंचमी। विभाषागुणेऽस्त्रियां। षष्ठीहेतुप्रयोगे। सर्वनाम्नस्तृतीयाच। अपादानेपंचमी। अन्यारादितरर्त्तेदिक्शब्दांचूत
गि व रपदाजाहियुक्ते। षष्ठ्यतसर्थप्रत्ययेन। एनपाद्वितीया। पृथग्विनानानाभिस्तृतीयान्यतरस्यां। करणेचस्तोकाल्पकृच्छ्रकतिप
व यस्यासत्त्ववचनस्य। दूरांतिकार्थैःषष्ठ्यन्यतरस्यां। दूरांतिकार्थेभ्योद्वितीयाच। सप्तम्यधिकरणेच। यस्यचभावेनभावलक्षणं। ष
ष्ठीचानादरे। स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च। आयुक्तकुशलाभ्यांचासेवायां॥२॥ यतश्चनिर्धारणं। पंचमी

॥६॥ विभक्तौ। साधुनिपुणाभ्यामर्चायांसप्तम्यप्रतेः। प्रसितोत्सुकाभ्यांतृतीयाच। नक्षत्रेचलुपि। प्रातिपदिकार्थलिंगपरिमाणवचनमा

त्रेप्रथमा। संबोधनेच। सामंत्रितं। एकवचनंसंबुद्धिः। षष्ठीशेषे। ज्ञोविदर्थस्यकरणे। अधीगर्थदयेशांकर्मणि। रुजार्थानांभावेवचनेऽज्वरेः। आशिषिनाथः। जासिनिप्रहणनाटक्राथपिषांहिंसायां। व्यवहृपणोः समर्थयोः। दिवस्तद

(७) र्थस्य। विभाषोपसर्गे। द्वितीयाब्राह्मणे॥ ३॥ प्रेष्यब्रुवोर्हविषोदेवतासंप्रदाने। चतुर्थ्यर्थेबहुलंछंदसि। यजेश्चकरणे। कृत्वोर्थ

प्रयोगेकालेधिकरणे। कर्तृकर्मणोःकृति। उभयप्राप्तौकर्मणि। क्तस्यचवर्तमाने। अधिकरणवाचिनश्च। नलोकाव्ययनि

ष्ठाखलर्थतृनां। अकेनोर्भविष्यदाधमर्ण्ययोः। कृत्यानांकर्तरिवा। तुल्यार्थैरतुलोपमाभ्यांतृतीयान्यतरस्यां। चतुर्थीचाशिष्या

युष्यमद्रभद्रकुशलसुखार्थहितैः॥ ४॥ अनभिहितइदंभूतयतश्चप्रेष्यब्रुवोस्त्रयोदश॥ ॥ इतितृतीयःपादः॥ ॥

द्विगुरेकवचनं। द्वंद्वश्चप्राणितूर्यसेनांगानां। अनुवादेचरणानां। अध्वर्युक्रतुरनपुंसकं। अध्ययनतोविप्रकृष्टाख्यानां। वि

शिष्टलिंगोनदीदेशोग्रामाः। क्षुद्रजंतवः। येषांचविरोधःशाश्वतिकः। शूद्राणामनिरवसितानां। गवाश्वप्रभृतीनिच। विभाषावृक्षमृ

गतृणधान्यव्यंजनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणां। विप्रतिषिद्धंचानधिकरणवाचि। नदधिकरणैतावत्त्वेच। विभाषास

(7A.)

मीपि। सनपुंसकं। अव्ययीभावश्च तत्पुरुषोनञ्कर्मधारयः। संज्ञायां कंथोशीनरेषु॥३॥ उपज्ञोपक्रमं तदाद्याचिख्यासायां। छाया बाहुल्ये। सभा
राजा मनुष्यपूर्वा। अशालाच। विभाषा सेनासुराछायाशालानिशानां। परवल्लिंगं द्वंद्वतत्पुरुषयोः। पूर्ववदश्ववडवौ। हेमंतशिशिरावहोरात्रे च
छंदसि। रात्राह्नाहाः पुंसि। अपथं नपुंसकं। अर्धर्चाः पुंसि च। इदमोन्वादेशेशनुदात्तस्तृतीयादौ। एतदस्त्रतसोस्त्रतसौ चानुदात्तौ। द्वितीया
टौस्स्वेनः। आर्धधातुके। अदो जग्धिर्ल्यप्ति किति। लुङ्सनोर्घस्लृ। घञपोश्च। बहुलं छंदसि। लिट्यन्यतरस्यां॥२॥ वेञो वयिः। हनो वध लिङि।
स्वे लुङि च। आत्मनेपदेष्वन्यतरस्यां। इणो गा लुङि। णौ गमिरबोधने। सनि च। इङश्च। गाङ् लिटि। विभाषा लुङ्लृङोः। अस्तेर्भूः। ब्रुवो वचिः। च
क्षिङः [redacted] स्याञ्। वा लिटि। अजेर्व्यघञपोः। वा यौ। ण्यक्षत्रियार्षञितो यूनि लुगणिञोः। पैलादिभ्यश्च। इञः प्राच्यो॥३॥ न तौल्वलिभ्यः। तद्रा
जस्य बहुषु तेनैवास्त्रियां। यस्कादिभ्यो गोत्रे। यञञोश्च। अत्रिभृगुकुत्सवसिष्ठगोतमांगिरोभ्यश्च। बह्वच इञः प्राच्यभरतेषु। न गोपवनादिभ्यः।
तिककितवादिभ्यो द्वंद्वे। उपकादिभ्योन्यतरस्यामद्वंद्वे। आगस्त्यकौंडिन्ययोरगस्तिकुंडिनच्। सुपो धातुप्रातिपदिकयोः। अदिप्रभृतिभ्यः शपः।
बहुलं छंदसि। यङोचि च। जुहोत्यादिभ्यः श्लुः। बहुलं छंदसि। गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु। विभाषा घ्राधेट्शाच्छासः। तना
दिभ्यस्तथासोः। मंत्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेः॥४॥ आमः। अव्ययादाप्सुपः। नाव्ययीभावादतोम्त्वपंचम्याः। तृतीया
सप्तम्योर्बहुलं। लुटः प्रथमस्य डारौरसः॥५॥ द्विगुरुपज्ञोपक्रमं वेञो वयिर्न तौल्वलिभ्य आमः पंच॥ ॥ इति द्वितीयाध्यायस्य चतुर्थः

सू०पा०

॥७॥

(४)

पादः॥ ॥ इतिद्वितीयोध्यायःसमाप्तः॥ ॥ॐ॥ प्रत्ययः॥ परश्च। आद्युदात्तश्च। अनुदात्तौसुप्पितौ। गुप्तिज्किद्भ्यः सन्। मान्बधदान्शा
न्भ्योदीर्घश्चाभ्यासस्य। धातोः कर्मणः समानकर्तृकादिच्छायां वा। सुप आत्मनः क्यच्। उपमानादाचारे। कर्तुः क्यङ् सलोपश्च। भृशादि
भ्योभुव्य[illegible]च्वेर्लोपश्च हलः। लोहितादिडाज्भ्यः क्यष्। कष्टाय क्रमणे। कर्मणो रोमन्थतपोभ्यां वर्तिचरोः। बाष्पोष्मभ्यामुद्वमने। शब्दवैरक
लहाभ्रकण्वमेघेभ्यः करणे। सुखादिभ्यः कर्तृवेदनायां। नमोवरिवश्चित्रङः क्यच्। पुच्छभांडचीवरा[illegible]ङ्॥१॥ मुंडमिश्रश्लक्ष्णलवणव्रत णि४
वस्त्रहलकलकृततूस्तेभ्योणिच्। धातोरेकाचोहलादेः क्रियासमभिहारे यङ्। नित्यं कौटिल्ये गतौ। लुपसदचरजपजभदहदशगृभ्यो भावगर्हायां।
सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्। हेतुमति च। कण्ड्वादिभ्यो यक्। गुपूधूपविच्छिपणिपनिभ्य आयः।
ऋतेरीयङ्। कमेर्णिङ्। आयादय आर्धधातुके वा। सनाद्यंता धातवः। स्यतासी लृलुटोः। सिब्बहुलं लेटि। कास्प्रत्ययादाममंत्रे लिटि। इजादेश्च गुरुमतोनृच्छः। दया
यासश्च। उषविदजागृभ्योन्यतरस्यां। भीह्रीभृहुवां श्लुवच्च। कृञ्चानुप्रयुज्यते लिटि॥२॥ विदांकुर्वंत्वित्यन्यतरस्यां। अभ्युत्सादयांप्रजनयांचिकयां
म रमयामकः पावयांक्रियाद्विदामक्रन्निति छंदसि। च्लि लुङि। च्लेः सिच्। शलइगुपधादनिटः क्सः। श्लिष आलिंगने। न दृशः। णिश्रिद्रुस्रुभ्यः कर्तरि
चङ्। विभाषा धेट्श्व्योः। गुपे[illegible]श्छंदसि। नोनयतिध्वनयत्येलयत्यर्दयतिभ्यः। अस्यतिवक्तिख्यातिभ्योङ्। लिपिसिचिह्वश्च। आत्मनेपदेष्वन्यतरस्यां।
पुषादिद्युताद्यॢदितः परस्मैपदेषु। सर्तिशास्त्यर्तिभ्य[illegible]श्च। इरितो वा। जृस्तम्भुम्रुचु[illegible]म्लुचुग्रुचुग्लुचुग्लुंचुश्विभ्यश्च। कृमृदृरुहिभ्यश्छंदसि। चिण्ते

॥७॥

परः॥३॥दीपजनबुधपूरितायिप्यायिभ्योन्यतरस्यां॥ अचःकर्मकर्तरि। दुहश्च। नरुधः। तपोनुतापेच। चिण्भावकर्मणोः। सार्वधातुकेयक्। क
(8A) र्तरिशप्। दिवादिभ्यःश्यन्। वाभ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः। यसोनुपसर्गात्। संयसश्च। स्वादिभ्यःश्नुः। श्रुवःशृच। अक्षोन्य
तरस्यां। तनूकरणेतक्षः। तुदादिभ्यःशः। रुधादिभ्यःश्नम्। तनादिकृञ्भ्यउः। धिन्विकृण्व्योरच॥४॥ क्र्यादिभ्यःश्ना। स्तंभुस्तुंभुस्कंभुस्कुंभुस्कुञ्
भ्यःश्नुश्च। हलःश्नःशानज्झौ। छंदसिशायजपि। व्यत्ययोबहुलं। लिङ्याशिष्यङ्। कर्मवत्कर्मणातुल्यक्रियः। तपस्तपःकर्मकस्यैव। नदुहस्नु ट
दं मांयक्चिणौ। कुषिरजोःप्राचांश्यन्परस्मैपदंच। धातोः। तत्रोपपदंसप्तमीस्थं। कृदतिङ्। वासरूपोस्त्रियां। कृत्याःप्राङ्ण्वुलः। तव्यत्तव्यानीयरः।
अचोयत्। पोरदुपधात्। शकिसहोश्च। गदमदचरयमश्चानुपसर्गे॥५॥ अवद्यपण्यवर्यागर्ह्यपणितव्यानिरोधेषु। वह्यंकरणं। अर्यःस्वा
मिवैश्ययोः। उपसर्याकाल्याप्रजने। अजर्यंसंगतं। वदःसुपिक्यप्च। भुवोभावे। हनस्तच। एतिस्तुशास्वृदृजुषःक्यप्। ऋदुपधाच्चाक्लृपिचृतेः।
ईचखनः। भृञोसंज्ञायां। मृजेर्विभाषा। राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः। भिद्योद्ध्यौनदे। पुष्यसिध्यौनक्षत्रे। विपूयविनीयजि
त्यामुंजकल्कहलिषु। प्रत्यपिभ्यांग्रहेश्छंदसि। पदास्वैरिबाह्यापक्ष्येषुच। विभाषाकृवृषोः॥६॥ युग्यंचपत्रे। अमावस्यदन्यतरस्यां। छंद
सिनिष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृडानि। ऋहलो
र्ण्यत्। ओरावश्यके। आसुयुवपिरपिलपित्रपिचमश्च। आनाय्यो। नित्ये। प्रणाय्योसंमतौ। पाय्यसान्नाय्यनिकाय्यधाय्यामानहविर्नि

वाससाभिधेनीषु। कृतौ कुंडपाय्यसंचाय्यौ। अग्नौ परिचाय्योपचाय्यसमूह्याः। चित्याग्निचित्ये च। ण्वुल्तृचौ। नंदिग्रहिपचादिभ्यो ल्युणिन्यचः।
इगुपधज्ञाप्रीकिरः कः। आतश्चोपसर्गे। पाघ्राध्माधेड्दृशः शः। अनुपसर्गाल्लिंपविंदधारिपारिवेद्युदे। जिंचेतिसातिसाहिभ्यश्च। ददाति
दधात्योर्विभाषा। ज्वलितिकसंतेभ्यो णः॥ ७॥ श्याद्व्यधास्रुसंस्रु अतीणवसावहृलिहश्लिषश्वसश्च। दुन्योरनुपसर्गे। विभाषाग्र
हः। गेहे कः। शिल्पिनि ष्वुन्। गस्थकन्। ण्युट् च। हश्च व्रीहिकालयोः। प्रुसृल्वः समभिहारे वुन्। आशिषि च॥ ८॥ प्रस्ययोमुंडविशांदीप
जनोपसर्गिभ्यो वदायुग्यंशाद्यधोदेच॥ ॥ इति तृतीयाध्यायस्य प्रथमः पादः॥ ॥ कर्मण्यण्। ह्वावामश्च। आतोनुपसर्गे कः। सुप
पिस्थः। तुंदशोकयोः परिमृजापनुदोः। प्रे दाज्ञः। समि ख्यः। गापोष्टक्। हरतेरनुद्यमनेच्। वयसि च। आङि ताच्छील्ये। अर्हः। स्तंब
करणयोरमिजपोः। शमि धातोः संज्ञायां। अधिकरणे शेतेः। चरेष्टः। भिक्षासेनादायेषु च। पुरोग्रतोग्रेषु सर्तेः। पूर्वे कर्तरि। कृ
ञो हेतुताच्छील्यानुलोम्येषु॥ १॥ दिवाविभानिशाप्रभाभास्कारांतानंतादिबहुनांदीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्र
संख्याजंघाबाह्वहर्यत्तद्धनुररुष्षु। कर्मणि भृतौ। न शब्दश्लोककलहगाथावैरचाटुसूत्रमंत्रपदेषु। स्तंबशकृतोरिन्। हरते
र्दृतिनाथयोः पशौ। फलेग्रहिरात्मंभरिश्च। छंदसि वनसनरक्षिमथां। एजेः खश्। नासिकास्तनयोर्ध्माधेटोः। नाडीमुष्ट्यो

(१)

स्कु

(9A) श्च। उदि कूले रुजिवहोः। वहाभ्रे लिहः। परिमाणे पचः। मितनखे च। विध्वरुषोस्तुदः। आसूर्यललाटयोर्दृशितपोः। उग्रंपश्येरं
रंमदपाणिंधमाश्च। प्रियवशे वदः खच्। द्विषत्परयोस्तापेः। वाचियमो व्रते॥२॥ पूःसर्वयोर्दारिसहोः। सर्वकूलाभ्रकरीषेषु कषः।
मेघर्तिभयेषु कृञः। क्षेमप्रियमद्रेण्च। आशिते भुवः करणभावयोः। संज्ञायां भृतृवृजिधारिसहितपिदमः। गमश्च। अंत्यंताध्वदू त
श रपारसर्वानंतेषु डः। आशिषि हनः। अपेक्लेशतमसोः। कुमारशीर्षयोर्णिनिः। लक्षणे जायापत्योष्टक्। अमनुष्यकर्तृके च। शक्तौ हस्ति
कपाटयोः। पाणिघताडघौ शिल्पिनि। आढ्यसुभगस्थूलपलितनग्नांधप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन्। क
र्तरि भुवः खिष्णुच्खुकञौ। स्पृशोनुदके क्विन्। ऋत्विग्दधृक्स्रग्दिगुष्णिगंचुयुजिक्रुंच्यां च। त्यदादिषु दृशोनालोचने कञ्च॥३॥
सत्सूद्विषद्रुहदुहयुजविदभिदछिदजिनीराजामुपसर्गेपि क्विप्। भजो ण्विः। छंदसि सहः। वहश्च। कव्यपुरीषपुरीष्येषु ञ्युट्।
नं हव्येनंतःपदं। जनसनखनक्रमगमो विट्। अदोनन्ने। क्रव्ये च। दुहः कब्घश्च। मंत्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन्। अवे यजः।
विजुपे छंदसि। आतो मनिन्क्वनिब्वनिपश्च। अन्येभ्योपि दृश्यंते। क्विप्च। स्थः क च। सुप्यजातौ णिनिस्ताच्छील्ये। कर्तर्युपमाने। व्रते॥४॥
बहुलमाभीक्ष्ण्ये। मनः। आत्ममाने खश्च। भूते। करणे यजः। कर्मणि हनः। ब्रह्मभ्रूणवृत्रेषु क्विप्। बहुलं छंदसि। सुकर्मपापमंत्रपुण्ये

सू०पा०

म

॥१॥ षुक्रिवः। अग्नौचेः। कर्मण्यग्न्याख्यायां। कर्मणीनिविक्रियः। दृशेः क्वनिप्। राजनियुधिकृञः। सहेच। सप्तम्यांजनेर्डः। पंचम्यामजातौ।
उपसर्गेचसंज्ञायां। अनौकर्मणि॥५॥ अन्येष्वपिदृश्यते। निष्ठा। स्रुयजोर्ङ्वनिप्। जीर्यतेरतृन्। छंदसिलिट्। लिटःकानज्वा। क्वसु
(१०) श्च। भाषायांसदवसश्रुवः। उपेयिवाननाश्वाननूचानश्च। लुङ्। अनद्यतनेलङ्। अभिज्ञावचनेलृट्। नयदि। भाषासाकांक्षे। परोक्षे वि
लिट्। हशश्वतोर्लङ्च। प्रश्नेचासन्नकाले। लट्स्मे। अपरोक्षेच। ननौपृष्टप्रतिवचने॥६॥ नन्वोर्विभाषा। पुरिलुङ्चास्मे। वर्तमा
नेलट्। लटःशतृशानचावप्रथमासमानाधिकरणे। संबोधनेच। लक्षणहेत्वोःक्रियायाः। तौसत्। पूङ्यजोःशानन्। ताच्छील्यवयो
वचनशक्तिषु चानश्। इङ्धार्योःशत्रकृच्छ्रिणि। द्विषोमित्रे। सुञोयज्ञसंयोगे। अर्हःप्रशंसायां। आक्वेस्तच्छीलतद्धर्मतत्साधुका ल
रिषु। तृन्। अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्। मद उच्यपत्रपवृतुवृधसहचरइष्णुच्। णेश्छंदसि। भुवश्च। ग्लाजिस्थ
श्च क्स्नुः। त्रसिगृधिधृषिक्षिपेः क्नुः॥७॥ शमित्यष्टाभ्योघिनुण्। संपृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्व
२८ रपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयुजाक्रीडविविचत्यजरजभजातिचरापचरामुषाभ्याहनश्च। वौकष
लसकत्थस्रंभः। अपेचलषः। प्रेलपसृद्रुमथवदवसः। निंदहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवादिव्याभाषासू ॥१॥

प र

Rajwade Sanshodhan Mandal, Dhule and the ... Pratishthan, Mumbai

5

(10A)

योवुन्। देविक्रुशोश्चोपसर्गे। चलनशब्दार्थादकर्मकाद्युच्। अनुदात्तेतश्चहलादेः। जुचंक्रम्यदंद्रम्यसृगृधिज्वलशुचलु
षपतपदः। क्रुधमंडार्थेभ्यश्च। नयः। सूददीपदीक्षश्च। लषपतपदस्थाभूवृषहनकमगमशृभ्यउकञ्। जल्पभिक्षकुट्टलुंट
वृङः षाकन्। प्रजोरिनिः। जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्च। स्पृहिगृहिपतिदयिनिद्रातंद्राश्रद्धाभ्यआलुच्।
दाधेट्सिशदसदोरुः। सृघस्यदः क्मरच्॥८॥ भंजभासमिदोघुरच्। विदिभिदिच्छिदेः कुरच्। इण्नशजिसर्तिभ्यः क्वरप्। गत्व
रश्च। जागुरूकः। यजजपदशांयङः। नमिकंपिस्म्यजसकमहिंसदीपोरः। सनाशंसभिक्षउः। विंदुरिच्छुः। क्याच्छंदसि। आदृगम
दू। हनजनः किकिनौलिट्च। स्वपितृषोर्नजिङ्। शॄवंद्योरारुः। भियः क्रुक्लुकनौ। स्थेशभासपिसकसोवरच्। श्चयवः संज्ञांतरयोः।
विप्रसंभ्योड्वसंज्ञायां॥९॥ धः कर्मणिष्ट्रन्। दाम्नीशसयुलूधूसूखनसहचरयित्रः। पुवः संज्ञायां। कर्तरिदेवतयोः। ञीतः क्तः।
मतिबुद्धिपूजार्थेभ्यश्च॥१०॥ कर्मणिद्विपापूःसर्वेसत्कबहुलमन्येषपिनन्खोः शमितिजैर्मैभासधकर्मण्यस्तो॥ ॥
इतितृतीयाध्यायस्यद्वितीयःपादः॥ ॥ उणादयोबहुलं। भूतेपिदृश्यंते। भविष्यतिगम्यादयः। यावत्पुरानिपातयोर्लट्। विभाषा
कदाकर्ह्योः। किंवृत्तेलिप्सायां। लिप्स्यमानसिद्धौच। लोडर्थलक्षणेच। लिङ्चोर्ध्वमौहूर्तिके। तमुन्ण्वुलौक्रियायांक्रियार्थायां।

मा

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com